कफनिमित्तजस्य माधवकरनिदानोक्तं लक्षणं यथा
"स्तैमित्यं स्तिमितो वेग आलस्यं मधुरास्यता । शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि च । गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रता । प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता" ।

वातपैत्तिकस्य लक्षणं यथा "तृष्णा मूर्च्छा भ्रमो दाहः स्वप्ननाशः शिरोरुजा । कण्ठास्यशोषो वमथूरोमहर्षोऽरुचिस्तमः । पर्वभेदश्च जृम्भा च वातपित्तज्वराकृतिः ।

वातश्लैष्मिकस्य लक्षणं यथा
"स्तैमित्यं पर्व्वणां भेदो निद्रा गौरवमेव च । शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्त्तनम् । सन्तापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः" ।

पित्तश्लैष्मिकस्य लक्षणं यथा
"लिप्ततिक्तास्यता तन्द्रा मोहः कासोऽरुचिस्तृषा । मुहुर्दाहो मुहुःशीतं पित्तश्लेष्मज्वराकृतिः" ।

सान्निपातिकस्य लक्षणं यथा
"क्षणे दाहः क्षणे शीतमस्थिसन्धिशिरोरुजा । सास्रावे कलुषे रक्ते निभग्ने चापि लोचने । सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः । तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः । परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गता परम् । ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च । शिरसो लोटनं तृष्णा निद्रानाशो हृदि व्यथा । स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः । कृशत्वं नातिगात्राणां सततं कण्ठकूजनम् । कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम् । मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च । चिरात् पाकश्च दोषाणां सन्निपातज्वराकृतिः" ।

असाध्यस्य सान्निपातिकस्य तस्य लक्षणं यथा
"दोषे विबद्धे नष्टेऽग्नौ सर्वसम्पूर्णलक्षणः । सन्निपातज्वरोऽसाध्यः कृच्छ्रसाध्यस्ततोऽन्यथा । सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा । पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा । सप्तमी द्विगुणा (चतुर्द्दशी) चैव नवम्येकादशी तथा । एषा त्रिदोषमर्य्यादा मोक्षाय च बधाय च । सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः । शोथः संजायते तेन कश्चिदेव प्रमुच्यते" ।

जीर्णस्य लक्षणं यथा
"त्रिसप्ताहव्यतीतस्तु ज्वरो यस्तनुतां गतः । प्लीहाग्निसादं कुरुते स जीर्ण इति उच्यते" ।

आगन्तोर्लक्षणं यथा "अभिघाताभिचाराभ्यामभिषङ्गाभिशापतः । आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत्" ।

विषभक्षणजागन्तुकस्य तस्य लक्षणं यथा
"श्यावास्यता विषकृते तथातीसार एव च । भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया" ।

ओषधीगन्धजस्य कामजस्य च तस्य लक्षणं यथा ।
"औषधीगन्धजे मूर्च्छा शिरोरुग्वमथुस्तथा । कामजे चित्तविभ्रंशस्तन्द्रालस्यमभोजनम्" ।

भयादिजस्य लक्षणं यथा "भयात् प्रलापः शोकाच्च भवेत् कोपाच्च वेपथुः । अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते । भूताभिषङ्गादुद्वेगो हास्यरोदनकम्पनम् । कामशोकभयाद्वायुः क्रोधात् पित्तं त्रयो मलाः । भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः" ।

विषमज्वरस्य संप्राप्तिर्यथा
"दोषोऽल्पोऽहितसम्भूतो ज्वरोत्सृष्टस्य वा पुनः । धातुमन्यतमं प्राप्य करोति विषमज्वरम्" ।

सन्ततादिज्वराणां प्रतिनियतं धातवो दूष्यास्तथा हि
"सन्ततो रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः । मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः पुनः । कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम् । सप्ताहं वा दशाहं वा द्वादशाहमथापि वा । सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते । अहोरात्रे सन्ततको द्वौ कालावनुवर्त्तते । अन्येद्युष्कस्त्वहोरात्र एककालं प्रवर्त्तते । तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः । केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् । कफपित्तात् त्रिकग्राही पृष्ठाद्वात कफात्मकः । वातपित्ताच्छिरोग्राही त्रिविधः स्यात् तृतीयकः । चतुर्थको दर्शयति प्रभावं द्विविधं ज्वरः । जङ्घाभ्यां श्लैष्मिकः पूर्वं शिरस्तोऽनिलसम्भवः । विषमज्वर एवान्यश्चातुर्थकविपर्य्ययः । मध्ये अहनी ज्वरयत्यादावन्ते च मुञ्चति" ।

वातबलासकलक्षणं
"नित्यं मन्दज्वरो रूक्षः शूनकस्तेन सीदति । स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी" ।

प्रलेपकलक्षणं यथा
"प्रलिम्पन्निव गात्राणि घर्म्मेण गौरवेण वा । मन्दज्वरो विलेपी च सशीतः स्यात् प्रलेपकः" ।

विषमज्वरविशेषाः ।
"विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते । तेनार्द्ध"